# Nandikeshaproktam Shivadharmanuvarnanam

# नन्दिकेशप्रोक्तं शिवधर्मानुवर्णनम्

## Document Information

Text title : Nandikeshaproktam Shivadharmanuvarnanam

File name : shivadharmAnuvarNanaMnandikeshaproktam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 34| 3-24 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# नन्दिकेशप्रोक्तं शिवधर्मानुवर्णनम्

आराधनं च भवति करोति भगवानापि ।
सन्तुष्टो येन भगवान् सौभाग्यं स्थिरतामियात् ॥ १॥

इत्युक्त्वा सोऽपि सन्तुष्टो भोगारम्भसमावृतः ।
शिवार्चनपरो नित्यं शिवनामरतोऽभवत् ॥ २॥

तेनाप्युन्नतमुत्कृष्टं कारितं रत्नमन्दिरम् ।
तस्य नार्मदलिङ्गस्य सर्वाभरणभूषितम् ॥ ३॥

मणिमालासमाक्रान्तं रत्नप्राकारसंयुतम् ।
स पञ्चामृतकुल्याभिः चक्रे लिङ्गाभिषेचनम् ॥ ४॥

दिव्यनीरप्रवाहैश्च शीतलैर्गन्धसंयुतैः ।
कस्तूरीघनसारादिनानाद्रव्यसमन्वितैः ॥ ५॥

चन्दनं च घनीभूतं दिव्यगन्ध समन्वितम् ।
दत्तमीशाय तेनैव रत्नैरभ्यर्चितः शिवः ॥ ६॥

गोघृतेनैव दिव्येन दीपमालाः कृताः खलु ।
ताभिः प्रभान्वितं जातं सर्वं ब्रह्माण्डमण्डलम् ॥ ७॥

बिल्वमन्दारकुसुमैः कमलैरमलैरपि ।
अन्यैश्च विविधैः पुष्पैः गन्धासारसमन्वितैः ॥ ८॥

सुवर्णपुष्पमालाभिः नानारत्नसमन्वितैः ।
मुक्ताहारैरविरलैः नीलमालाभिरादरात् ॥ ९॥

बिल्वपल्लवमालाभिरमलाभिर्विशेषतः ।
अतुलाभिरमूल्याभिः पूजयामास शङ्करम् ॥ १०॥

नानाविधैर्धूपदीपैः धूपयित्वा सदाशिवम् ।
नैवेद्यं कल्पयामास स चान्नैर्विविधैरपि ॥ ११॥

परमान्नप्रवाहैश्च शर्कराज्यसमन्वितैः ।
वटकाद्यैर्भक्षसङ्घैः अपारैर्मधुरैरपि ॥ १२॥

नारिकेलजलानां च प्रवाहैः शीतलैर्जलैः ।
एलालवङ्गसंयुक्तैः ताम्बूलैरमलैरपि ॥ १३॥

रत्नछत्रैश्चामरैश्च दुकूलैर्दर्पणैरपि ।
प्रणामैरपि नाट्यैश्च तोषयामास शङ्करम् ॥ १४॥

दिव्यान्नैः शिवनैवेद्यैः तोषयामास कोटिशः ।
शाम्भवाग्रेसरानेव ददौ तेभ्यो धनान्यपि ॥ १५॥

गोसहस्राणि दत्तानि शैवेभ्यस्तेन सादरम् ।
विविधान्यपि धान्यानि तेभ्यो दत्तानि तेन तु ॥ १६॥

प्रत्यहं दृढया भक्त्या पूजामेवं विधाय सः ।
आसायमुपवासेन निशि भुङ्क्ते शिवार्चकः ॥ १७॥

एवं संवसतस्तस्य द्रष्टुं सर्वं शिवोत्सवम् ।
सनकाद्यैः सहानन्तर्मुनिभिरदो ययौ ॥ १८॥

स दूरेणैव तान् दृष्ट्वा भस्मोद्धूलितविग्रहान् ।
रुद्राक्षमालाभरणान् हृष्टः सादरमास्तिकः ॥ १९॥

तानागतान् प्रयत्नेन नत्वा भक्तिपुरस्सरम् ।
पूजां विधाय विहितां रत्नसिंहासनस्थितान् ॥ २०॥

स्वयं च भस्मोद्धूल्य सर्वाङ्गान्यपि भक्तितः ।
रुद्राक्षमालाभरणः पप्रच्छ शिववैभवम् ॥ २१॥

महेश्वराराधनस्य प्रकारः कः परः श्रुतः ।
किं तत्फलं चाधिकारी के वा तन्मे वदन्तु वा ॥ २२॥

॥ इति शिवरहस्यान्तर्गते नन्दिकेशप्रोक्तं शिवधर्मानुवर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । हराख्यः तृतीयांशः । पूर्वार्धम् । अध्यायः ३४। ३-२४ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 34. 3-24 ..

Proofread by Ruma Dewan

*Nandikeshaproktam Shivadharmanuvarnanam*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*